राधानामोच्चारणानन्तरं कृष्णनामोच्चारण-विधिर्यथा,—

नारद उवाच ।

"आदौ राधां समुच्चार्य्य पश्चात् कृष्णं विदुर्ब्बुधाः ।
निमित्तमस्य मां भक्तं वद भक्तजनप्रिय ॥

श्रीनारायण उवाच ।

निमित्तमस्य त्रिविधं कथयामि निशामय ।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता ॥
गरीयसीति जगतां माता शतगुणैः पितुः ।
राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः ॥
कृष्णराधेशगौरीति लोके न च कदा श्रुतः ।
प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम ॥
गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर ।
प्रसीद कमलाकान्त गृहाण मम पूजनम् ॥
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम ।
राशब्दोच्चारणादेव स्फीतो भवति माधवः ।
धाशब्दोच्चारतः पश्चाद्धावत्येव ससम्भ्रमः ॥
आदौ पुरुषमुच्चार्य्य पश्चात् प्रकृतिमुच्चरेत् ।
स भवेन्मातृगामी च वेदातिक्रमणे मुने ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५२ अध्यायः ॥

तस्या निन्दायां दोषो यथा,—

"ये वा द्विषन्ति निन्दन्ति पापिनश्च हसन्ति च ।
कृष्णप्राणाधिकां देव देवीञ्च राधिकां पराम् ॥
ब्रह्महत्याशतं ते च लभन्ते नात्र संशयः ।
तत्पापेन च पच्यन्ते कुम्भीपाके च रौरवे ॥
तप्ततैले महाघोरे ध्वान्ते कीटे च यन्त्रके ।
चतुर्द्दशेन्द्रावच्छिन्नं पितृभिः सप्तभिः सह ॥
ततः परमजायन्त जन्मैकं कोलयोनितः ।
दिव्यं वर्षसहस्रञ्च विष्ठाकीटाश्च पापतः ॥
पुंश्चलीनां योनिकीटास्तद्रक्तमलभक्षकाः ।
मलकीटाश्च तन्मानवर्षञ्च पूयभक्षकाः ।
वेदे च काण्वशाखायामित्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अध्यायः ॥

राधास्वरूपं यथा,—

यशोदोवाच ।

"हरौ च निश्चला भक्तिस्त्वद्दास्यं वाञ्छितं मम ।
तव नाम्नश्च व्युत्पत्तिं का वा त्वं वक्तुमर्हसि ॥

राधिकोवाच ।

भवेद्भक्तिर्निश्चला ते हरेर्दास्यञ्च दुर्लभम् ।
लभस्व मद्वरेणापि कथयामि स्वनिर्णयम् ॥
पुरा नन्देन दृष्टाहं भाण्डीर वटमूलके ।
मया च कथितो नन्दो निषिद्धस्य व्रजेश्वरः ॥
अहमेव स्वयं राधा छाया रायाणकामिनी ।
रायाणः श्रीहरेरंशः पार्षदप्रवरो महान् ॥
राशब्दश्च महद्विष्णोर्विश्वानि यस्य लोमसु ।
विश्वप्राणिषु विश्वेषु धा धात्रीमातृवाचकः ॥
धात्री माताहमेतेषां मूलप्रकृतिरीश्वरी ।
तेन राधा समाख्याता हरिणा च पुरा बुधैः ॥
अहं श्रीदामशापेन वृषभानुसुताधुना ।
शतवर्षञ्च विच्छेदो हरिणा सह साम्प्रतम् ॥
वृषभानुश्च कृष्णस्य पार्षदप्रवरो महान् ।
पितॄणां मानसी कन्या मम माता कलावती ॥
अयोनिसम्भवाहञ्च मम माता च भारते ।
पुनः साहञ्च युष्माभिर्यास्यामि श्रीहरेः पदम् ॥
इति ते कथितं सर्व्वं व्रजं व्रज व्रजेश्वरि ।
व्रजेश्वरेण सहिता स्वामिना ज्ञानिना सति ! ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥

राधापार्व्वत्योरभेदो यथा,—

पार्व्वत्युवाच ।

"किं वा प्रश्नं करिष्यामि त्वां राधां मङ्गला-लयाम् ।
गता ते विरहज्वाला श्रीदाम्नः शापमोचने ॥
सततं तन्मनःप्राणा त्वय्येव मयि ते तथा ।
न ह्येवमावयोर्भेदः शक्तिपुरुषयोर्यथा ॥
ये त्वां निन्दन्ति मद्भक्तास्त्वद्भक्ताश्चापि मामपि ।
कुम्भीपाके च पच्यन्ते यावच्चन्द्रदिवाकरौ ॥
राधामाधवयोर्भेदं ये कुर्व्वन्ति नराधमाः ।
वंशहानिर्भवेत्तस्य पच्यन्ते नरकं चिरम् ॥
यान्ति शूकरयोनिञ्च पितृभिः शतकैः सह ।
षष्टिं वर्षसहस्राणि विष्ठायां कृमयस्तथा ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२३ अध्यायः ॥

गोलोके तस्या आश्रमो यथा,—

"एतान् मनोरमान् दृष्ट्वा ते देवा गमनोन्मुखाः ।
जग्मुः शीघ्रं कियद्दूरं ददृशुः सुन्दरं ततः ॥
आश्रमं राधिकायाश्च रासेश्वर्य्याश्च नारद ।
देवाधिदेव्या गोपीनां वरायाश्चारु निर्म्मितम् ॥
प्राणाधिकायाः कृष्णस्य रम्याद्रम्यं मनोहरम् ।
सर्व्वानिर्व्वचनीयञ्च पण्डितैर्न निरूपितम् ॥
सुचारु वर्त्तुलाकारं षड्गव्यूतिप्रमाणकम् ।
शतमन्दिरसंयुक्तं ज्वलितं रत्नतेजसा ॥
अमूल्यरत्नसाराणां वरैर्विरचितं वरम् ।
दुर्लङ्घ्याभिर्गभीराभिः परिखाभिः सुशोभितम् ॥
कल्पवृक्षैः परिवृतं पुष्पोद्यानशतान्तरम् ।
सुमूल्यरत्नरचितं प्राकारैः परिवेष्टितम् ॥
सद्रत्नवेदिकायुक्तं युक्तैर्द्वारैश्च सप्तभिः ।
संयुक्तरत्नचित्रैश्च विचित्रैर्व्वर्त्तुलैर्मुने ॥
प्रधानद्वारसप्तभ्यः क्रमशः क्रमशो मुने ।
सर्व्वतोऽपि ततस्तत्र षोड़शद्वारसंयुतम् ॥
देवा दृष्ट्वा च प्राकारं सहस्रधनुरुच्छ्रितम् ।
सद्रत्नरत्नकलससमूहैः सुमनोहरम् ॥
सुदीप्तं तेजसा रम्यं परमं विस्मयं ययुः ।
ततः प्रदक्षिणीकृत्य कियद्दूरं ययुर्मुदा ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

तस्या जन्मतिथिर्यथा,—

"भाद्रस्य कृष्णपक्षे तु हरिजन्माष्टमी यदा ।
तस्याः परे तु या शुक्ला तस्यां जाता हरिप्रिया ।
वृषभानुपुरी नाम्ना सर्व्वरत्नमयी शुभा ।
सुवर्णमणिमाणिक्यविचित्रभवनाङ्गना ॥
अणिमादिसुखैश्वर्य्यपरिपूर्णमनोहरा ।
चित्रध्वजपताकादिविचित्रा चित्रनिर्म्मिता ॥
चिदानन्दस्वरूपा सा चिदानन्दप्रदायिनी ।
आनन्दकलिला नार्य्यो यत्र तिष्ठन्ति सर्व्वदा ॥
विचित्रवेशालङ्कारा विचित्रवसनाम्बरा ।
नानावेशविचित्राङ्गा प्रमदामोददायिनी ॥
सर्व्वलक्षणसम्पन्ना राधा नाम्ना विनोदिनी ।
जगतां मोहिनी देवी गुह्यगुह्यातिसुन्दरी ।
मूढ़ानामसताञ्चैव न कथ्यं मुनिसत्तम ॥

नारद उवाच ।

प्रणिपत्य महाभाग पृच्छामि तव किङ्करः ।
सा लक्ष्मीः किं सुरवधूर्महालक्ष्मीः सरस्वती ॥
विद्या किमन्तरङ्गा च वैष्णवी प्रकृतिः किमु ।
वेदकन्या देवकन्या मुनिकन्याथवा वद ॥

सदाशिव उवाच ।

कोटिकोटिमहालक्ष्मीर्लक्ष्मीः का सा परा वरा ।
निन्दिता यत्पदाम्भोजे कथिता मुनिसत्तम ॥
अपरं किं निगदेऽहमेकवक्त्रेण नारद ।
श्रीराधारूपलावण्यगुणादीन् वक्तुमक्षमः ॥
तत्तद्रूपादिमाहात्म्यं लज्जेऽहमपि नारद ।
त्रैलोक्ये तु समर्थो हि न मातुं वक्तुमर्हति ॥
तद्देहरूपमाधुर्य्यं जगन्मोहनमोहनम् ।
यद्यनन्तमुखोऽपि स्यां तद्वक्तुं नास्ति मे गतिः ॥
लक्षशः कमला दास्यो यस्याः सा लाक्षकी मता ।
एवं शतसहस्राणामीश्वरी राधिका परा ॥

नारद उवाच ।

प्रभो श्रीराधिकाजन्ममाहात्म्यं सर्व्वतः परम् ।
तदहं श्रोतुमिच्छामि समस्तं भक्तवत्सल ॥
कथ्यतां मे महाभाग व्रतानाञ्च व्रतोत्तमम् ।
ध्यानं वा कीदृशं पूजा स्तुतिर्वापि वदस्व मे ॥
तत्सर्व्वं श्रोतुमिच्छामि कथ्यतां मे सदाशिव ।
चर्य्या पूजाविधानञ्च विशेषमर्च्चनं भव ॥
यन्त्रं मन्त्रं स्तुतिर्ध्यानं पूजनं यत्र निर्म्मितम् ।
पूज्यते किं विधानञ्च तत्तत्सेवार्च्चने विधौ ॥

शिव उवाच ।

वृषभानुपुरीराजा वृषभानुर्महाशयः ।
महाकुलप्रसूतोऽसौ सर्व्वशास्त्रविशारदः ॥
महाशयो धनी श्रीमानणिमाद्यष्टवैभवः ।
वैश्यः सदन्तःकरणः कुलीनः कृष्णदैवतः ॥
तस्य भार्य्या महाभागा श्रीमत्श्रीकीर्त्तिदाह्वया ।
रूपयौवनसम्पन्ना महाराजकुलोद्भवा ॥
महालक्ष्मीस्वरूपा सा भव्या परमसुन्दरी ।
महापतिव्रता कार्ष्णा सर्व्वविद्यागुणान्विता ॥
तस्यां श्रीराधिका जाता श्रीमद्वृन्दावनेश्वरी ।
भाद्रे मासि सिताष्टम्यां मध्याह्ने शुभदायिनी ॥
वेदागमपुराणादिगीता या कृष्णवल्लभा ।
सदा कृष्णप्रिया साध्वी श्रीकृष्णानन्ददायिनी ॥
शृणु मत्तो महाभाग पूजनं भजनं तथा ।
कर्त्तव्यं यदनुष्ठानं राधाजन्ममहोत्सवः ॥
समर्च्चेय सदा राधां जन्मव्रतपरायणैः ।
तत् समग्रं प्रवक्ष्यामि ध्यानादिकमनुक्रमात् ॥
सर्व्वदा पश्चिमद्वारे श्रीराधाकृष्णमन्दिरे ।
ध्वजसम्वस्त्रकलसपताकातोरणादिभिः ॥
नानासुमङ्गलद्रव्यैर्यथाविधि प्रवर्त्तते ।
सुवासितगन्धपुष्पैर्धूपैश्च धूपितैर्गृणन् ॥
मध्ये पञ्चवर्णचूर्णैर्मण्डपं ससरोरुहम् ।
सुषोड़शदलाकारं तत्र निर्म्माय यत्नतः ॥
दिव्यासने पद्ममध्ये पश्चिमाभिमुखीं स्थिताम् ।